गुरुभिर्भर्त्सिता सा च रचिता च शतेन च ।
तथापि जारं कुरुते नापि साध्या नृपैरपि ॥
नास्ति तस्याः प्रियं किञ्चित् सर्व्वं कार्य्यवशेन च
गावस्तृणमिवारण्ये प्रार्थयन्ती नवं नवम् ॥
विद्युद्भासा जले रेखा तस्याः प्रीतिस्तथैव च ।
अधर्म्मयुक्ता सततं कपटं वक्ति निश्चितम् ॥
व्रते तपसि धर्म्मे च न मनो गृहकर्म्मणि ।
न गुरौ न च देवेषु जारे स्निग्धञ्च चञ्चलम् ॥
स्त्रीजातिविविधानाञ्च कथा च कथिता मया॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।८४।२६-४०
स्त्रीसंसर्गे दोषो यथा,—
सनत्कुमार उवाच ।
"अयि भ्रातः किं करोषि कुशलं युवतीपते ।
स्त्रीपुंसोर्व्वर्द्धते प्रेम नित्यं तन्नित्यनूतनम् ॥
अर्गलं ज्ञानमार्गस्य भक्तिद्वारकपाटकम् ।
मोक्षमार्गव्यवहितं चिरं बन्धनकारणम् ॥
गर्भवासस्य बीजञ्च परं नरककारणम् ।
पीयूषबुद्धा गरलं भुङ्क्ते पापी नराधमः ॥"
इति च तत्रैव । १३० । ३१—३३ ॥*॥
स्त्रीणां स्वभावा यथा,—
"स्त्रीस्वभावं चरित्रञ्च आश्चर्य्यं पापकारकम् ॥
क्षण नास्ति रहो नास्ति नास्ति कृत्ये विभावना
तेन नारद नारीणां सतीत्वमुपजायते ॥
एकवासा तथा गौरी श्यामा वा वरवर्णिनी ।
मध्यगण्डा प्रगल्भा च वयोऽतीतास्तथा स्त्रियः
सुरूपं पुरुषं दृष्ट्वा क्षरन्ति मुनिसत्तम ।
स्वभाव एष नारीणां शास्त्रस्य शृणु कारणम् ॥"
इति वाराहे सूर्य्यप्रतिष्ठाननामाध्यायः ॥*॥
अपि च ।
"विद्यावातो ह्यनभ्यासः स्त्रीणां घातः कुचेलता
व्याधीनां भोजनं जीर्णं शत्रोर्घातः प्रगल्भता
तस्करस्य वधो दण्डः कुमित्रस्याल्पभाषणम् ।
पृथक् शय्या तु नारीणां ब्राह्मणस्यानिमन्त्रिता
दुर्ज्जनाः शिल्पिनो दासा दुष्टाश्च पटहाः
स्त्रियः ।
ताड़िता मार्दवं यान्ति न ते सत्कारभाजनाः ॥
जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे।
मित्रञ्चापदि काले च भार्य्याञ्च विभवक्षये ॥
स्त्रीणां द्विगुणमाहारः प्रज्ञा चैव चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामाश्चाष्टगुणाः स्मृताः॥
न स्वप्नेन जयेन्निद्रां न कामेन स्त्रियं जयेत् ।
न चेन्धनैर्ज्जयेद्वह्निं न मद्येन तृषां जयेत् ।
समांसभोजनैः स्निग्धैर्मद्यैः सीधुसुरासवैः ।
वस्त्रैर्मनोहरैर्म्माल्यैः कामः स्त्रीषु विजृम्भते ॥
ब्रह्मचार्य्येव वक्तव्यः प्राप्तं मन्मथचेष्टितम् ।
हृद्यं हि पुरुषं दृष्ट्वा योनिः प्रह्लाद्यते स्त्रियाः ॥
सुवेशं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् ।
गरुं वा भिक्षुकं वाप्यमिच्छन्ति सततं स्त्रियः॥
नद्यश्च नार्य्यश्च समस्वभावाः
स्वतन्त्रता वेगबलाधिकाश्च ।
तोयैश्च दोषैश्च निपातयन्ति
नद्यो हि कूलानि कुलानि नार्य्यः ॥
नदी पातयते कूलं नारी पातयते कुलम् ।
नारीणाञ्च नदीनाञ्च स्वच्छन्दललिता गतिः ॥
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः।
नान्तकः सर्व्वभूतानां न पुंसां वामलोचना ॥
मनोऽनुकूलाः प्रमदा रूपवत्यः स्वलङ्कृताः ।
वासः प्रासादपृष्ठेषु स्वर्गः स्याच्छुभकर्म्मणः ॥
न दानेन न मानेन नार्ज्जवेन न सेवया ।
न शस्त्रेण न शास्त्रेण सर्व्वदा विषमाः स्त्रियः॥
इति गारुड़े १०९ अध्यायः ॥ * ॥
स्त्रीवधनिषेधो यथा,—
"अवध्याञ्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतेष्वपि ।
स त्वं सुपृथिवीपाल न धर्म्मं त्यक्तुमर्हसि ॥"
इति वह्निपुराणे पृथोरुपाख्याननामाध्यायः ॥
स्त्रीणामात्मदाने अस्वातन्त्र्यं यथा,—
"ततोऽब्रवीच्चाप्यबला नाहं त्वां पार्थिवात्मज।
दातुं शक्ता तथात्मानं स्वतन्त्रा न हि योषितः॥"
इत्युपक्रम्य ॥
"विश्वकर्म्मसुता माध्वी नाम्ना चित्राङ्गदाभवत्।
सा कदाचिन्महारण्यं सखीभिः परिवारिता ।
जगाम नैमिषं नाम स्नातुं कमललोचना ।
सा स्नातुमवतीर्णा च अथाभ्यागान्नरेश्वरः ॥
सुदेवतनयो धीमान् सुरथो नाम नामतः ।
तां ददर्श च तन्वङ्गीं शुभाङ्गीं मदनातुरः ॥
संहृत्तः सा सखीं प्राह वचनं सत्त्वसंयुता ।
असौ नराधिपसुतो मदनेन कदर्य्यते ।
मदर्थञ्च क्षमं मेऽस्य स्वप्रदानं सुरूपिणः ॥
सख्यस्तामब्रुवन् बाले न प्रगल्भासि सुन्दरि ।
न स्वातन्त्र्यं तवास्तीह प्रदाने स्वात्मनोऽनघे ॥
पिता तवास्ति धर्म्मिष्ठः सर्व्वशिल्पविशारदः ।
न ते युक्तमिहात्मानं दातुं नरपते स्वयम् ॥"
इति वामनपुराणे ६० अध्यायः ॥ * ॥
स्त्रीणां मध्य गुरवो यथा,—
"मातामही मातुलानी तथा मातुश्च सहोदरा।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु॥
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विजाः ।
अनुवर्त्तनमेतासां मनोवाक्कायकर्म्मभिः ॥"
इत्यादि ॥
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यावत् पिता च माता च द्वावेतौ निर्व्वि-
कारिणौ ।
तावत् सर्व्वं परित्यज्य पुत्त्रः स्यात्तत्परायणः ॥
माता पिता च सुप्रीतौ स्यातां पुत्त्रगुणैर्यदि ।
स पुत्त्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ॥
नास्ति मातृसमं दैवं नास्ति मातृसमं गुरुः ।
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ॥
तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा।
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाश्रयेत् ॥"
इति कौर्म्मे उपविभागे।११।२७,३१,३४-३७॥
व्यभिचारिण्याः स्त्रिया निर्व्वास्यत्वं यथा,—
"हृताधिकारां मलिनां पिण्डमात्रोपसेविनीम्
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ॥"
स्त्रीणां मेध्यत्वं त्याज्यत्वञ्च यथा,
"सोमः शौचं ददौ तासां गन्धर्व्वाश्च शुभां
गिरम् ।
पावकः सर्व्वभक्षित्वं मेध्या वै योषितो ह्यतः ॥
व्यभिचाराद्दृतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्त्तृवधे तासां तथा महति पातके ॥
सुरापी व्याधिता द्वेष्ट्री विहर्त्तव्या प्रियंवदा ।
भर्त्तव्या चान्यथा ह्येन ऋषयो हि भवेन्महत् ॥"
तस्याः प्रशंसा यथा,—
"यत्राविरुद्धं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते ।
मृते जीवति वा पत्यौ या नान्यमुपगच्छति ॥
सेह कीर्त्तिमवाप्नोति मोदते चोमया सह ।
शुभां त्यजंस्तृतीयांशं दाप्यो ह्याभरणं स्त्रियाः ।
स्त्रीभिर्भर्त्तृवचः कार्य्यं एष धर्म्मः परः स्त्रियाः॥"
स्त्रीगमनार्हकालो यथा,—
षोड़शर्त्तुर्निशाः स्त्रीणां तासु युग्मासु
संविशेत् ।
ब्रह्मचार्य्येव पर्व्वण्याद्याश्चतस्रस्तु वर्ज्जयेत् ॥
एवं गच्छेत् स्त्रियं क्षामां मघां मूलञ्च वर्ज्जयेत्
लक्षण्य जनयेदेव पुत्त्रं रोगविवर्ज्जितम् ॥
यदा कामी भवेच्चापि स्त्रीणाम्बरमनुस्मरन् ।
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतस्ततः ॥"*॥
भूषणादिना भर्त्रादिभिः स्त्रियः पूज्या यथा,—
"भर्त्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ।
बन्धुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ॥
स्त्रीभिः श्वश्रूश्वशुरयोः पादवन्दनं सदा कार्य्यम्
यथा,—
"संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी ।
श्वश्रूश्वशुरयोः कुर्य्यात् पादयोर्वन्दनं सदा ॥"
प्रोषितभर्त्तृकया क्रीड़ादिकं वर्ज्जनीयं यथा
"क्रीड़ां शरीरसंस्कारं समाजोत्सवदर्शनम्
हास्यं परगृहे यानं त्यजेत् प्रोषितभर्त्तृका ॥"
ज्येष्ठया स्त्रिया सह धर्म्मकर्म्मानुष्ठानं कर्त्तव्यम् ।
यथा,—
"ज्येष्ठां धर्म्मविधौ कुर्य्यान्न कनिष्ठां कदाचन।
दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः ॥
आहरेद्विधिवद्दारानग्निञ्चैवाविलम्बितः ।
स्थिता भर्त्तुर्द्दिवं गच्छेदिह कीर्त्तिमवाप्य च ॥"
इति गारुड़े । ९५ । ३२—३३ ॥
चञ्चलस्त्रीणां कुलनाशकत्वं यथा,—
"लवणजलान्ता नद्यः स्त्रीभेदान्तञ्च मैथुनम् ।
पैशुन्यं जनवार्त्तान्तं वित्तं दुःखत्रयान्तकम् ॥
राज्यश्रीर्ब्रह्मशापान्तं हालान्तं ब्रह्मवर्च्चसम् ।
आचारं श्रोषवासान्तं कुलस्यान्तं स्त्रियश्चलाः ॥
सर्व्वे क्षयान्ता निचयाः पतनान्ताः समु-
च्छ्रिताः ॥"
स्त्रीनायके वासनिषेधादि यथा,—
अनायके न वस्तव्यं वस्तव्य बहुनायके ।
स्त्रीनायके न वस्तव्यं वस्तव्य बालनायके ॥
त्यजेद्वन्ध्यामष्टमाब्दे नवमे तु मृतप्रजाम् ।
एकादशे स्त्रीजननीं सद्यश्चाप्रियवादिनीम् ॥
अनर्थित्वान्मनुष्याणां भिया परिजनस्य च ।